M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Sor. 765
Title: Kshurdiya Sashra Nama

765

765

विष्णो र्दिव्य सहस्र नाम

Vishnordivya Sahasrana-ma	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
765	: Remarks

765

नं. १

श्रीगणेशायनमः॥ॐ॥यस्यस्मरणमात्रेणज
न्मसंसारबंधनात्॥विमुच्यतेनमस्तस्मैवि
ष्णवेप्रभविष्णवे॥१॥नमःसमस्तभूताना
मादिभूतायभूभृते॥अनेकरूपरूपायवि
ष्णवेप्रभविष्णवे॥२॥वैशंपायनउवाच॥
श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः॥
युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत॥३॥
युधिष्ठिरउवाच॥किमेकंदैवतंलोकेकिंवा
प्येकंपरायण॥स्तुवंतःकंकमर्चंतःप्राप्नु

युर्मानवाःशुभं॥४॥कोधर्मःसर्वधर्माणां
भवतःपरमोमतः॥किंजपन्मुच्यतेजंतुर्जन्म
संसारबंधनात्॥५॥भीष्मउवाच॥जग
त्प्रभुंदेवदेवमनंतंपुरुषोत्तमं॥स्तुवन्नामस
हस्रेणपुरुषःसततोत्थितः॥६॥तमेवचा
र्चयन्नित्यंभक्त्यापुरुषमव्ययं॥ध्यायंस्तुवं
नमस्यंश्चयजमानस्तमेवच॥७॥अनादि
निधनंविष्णुंसर्वलोकमहेश्वरं॥लोकाध्यक्षं
स्तुवंनित्यंसर्वदुःखातिगोभवेत्॥८॥ब्रह्म

वि·स·
२

प्यंसर्वधर्मसंलोकानांकीर्तिवर्धनं॥लोकना
थंमहद्भूतंसर्वभूतभवोद्भवं॥९॥एषमेसर्वध
र्माणांधर्मोधिकतमोमतः॥यद्भक्त्यापुंडरीका
क्षंस्तवैरर्चन्नरःसदा॥१०॥परमंयोमहत्तेज
परमंयोमहत्तपः॥परमंयोमहद्ब्रह्मपरमंयःप
रायणं॥११॥पवित्राणांपवित्रंयोमंगलानां
चमंगलं॥दैवतंदेवतानांचभूतानांयोव्य
यःपिता॥१२॥यतःसर्वाणिभूतानिभवंसा
दियुगागमे॥यस्मिंश्चप्रलयंयांतिपुनरेव

राम
२

युगक्षये॥१३॥तस्यलोकप्रधानस्यजगन्नाथ
स्यभूपते॥विष्णोर्नामसहस्रंमेशृणुपापभया
पहं॥१४॥यानिनामानिगौणानिविख्यातानि
महात्मनः॥ऋषिभिःपरिगीतानितानिवक्ष्यामि
भूतये॥१५॥विष्णोर्नामसहस्रस्यवेदव्यासोम
हामुनिः॥छंदोनुष्टुप्तथादेवोभगवान्देवकी
सुतः॥१६॥विष्णुर्विष्णुर्महाविष्णुप्रभविष्णु
महेश्वरः॥अनेकरूपदैत्यांतंनमामिपुरुषोत्त
मं॥१७॥श्रीवेदव्यासउवाच॥अस्यश्रीविष्णो

वि·सह·
३

र्दिव्यसहस्रनामस्तोत्रमाला मंत्रस्य॥ श्रीभग
वान्वेदव्यासऋषिः॥ श्रीविष्णुः परमात्मा द
वता॥ अनुष्टुप्छंदः॥ आत्मयोनिः स्वयंजातइ
तिबीजं॥ देवकीनंदनस्त्वष्टेतिशक्तिः॥ उद्भवः क्षो
भणोदेवइतिपरमोमंत्रः॥ शार्ङ्गभृन्नंदकीच
क्रीतिकीलकं॥ त्रिसामासामगः सामेतिकव
चं॥ शार्ङ्गधन्वागदाधरइत्यस्त्रं॥ विश्वं विष्णु
र्वषट्कारइतिध्यानं॥ श्रीमहाविष्णुप्रीत्यर्थं
विष्णुसहस्रनामस्तोत्रजपेविनियोगः॥ ओम् राम्
३

विश्वंविष्णुर्वषट्कारइत्यंगुष्ठाभ्यांनमः॥ अ
मृतांशुद्भवोभानुरितितर्जनीभ्यांनमः॥ ब्रह्म
ण्याब्रह्मकृद्ब्रह्मेतिमध्यमाभ्यां॥ सुवर्णबिं
दुरक्षोभ्यइत्यनामिकाभ्यां॥ निमिषोनिमि
षः स्रग्वीतिकनिष्ठिकाभ्यां॥ रथांगपाणिर
क्षोभ्यइतिकरतलकरपृष्ठाभ्यां॥ ॐ विश्वं॥
हृदयाय॥ अमृतां॥ शिरसेस्वाहा॥ ब्रह्म॥
शिखायैवोषट्॥ सुवर्णबिं॥ कवचायहुं॥ नि
मिषोनि॥ नेत्रत्रयायवोषट्॥ रथांग॥ अस्त्रा॥

स॰ वि॰ ४

इतिहृदयादिन्यासः॥अथध्यानं॥ शांताकारं
भुजगशयनंपद्मनाभंसुरेशं॥विश्वाधारंगग
नसदृशंमेघवर्णंशुभांगं॥लक्ष्मीकांतंकमल
नयनंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभय
हरंसर्वलोकैकनाथं॥मेघःश्यामेपीतकौशे
यवासःश्रीवत्साकंकौस्तुभोद्भासितांगं॥पु
ण्यापेतंपुंडरीकायताक्षंविष्णुंवंदेसर्वलोकै
कनाथं॥इतिध्यानं॥ॐविश्वंविष्णुर्वषट्का
रोभूतभव्यभवत्प्रभुः॥भूतकृद्भूतभृद्भावो

राम॰ ४

भूतात्माभूतभावनः॥१॥पूतात्मापरमात्मा च
मुक्तानांपरमागतिः॥अव्ययःपुरुषःसाक्षीक्षे
त्रज्ञोक्षरएवच॥२॥योगोयोगविदांनेताप्रधान
पुरुषेश्वरः॥नारसिंहवपुःश्रीमान्केशवःपुरु
षोत्तमः॥३॥सर्वःशर्वःशिवःस्थाणुर्भूतादिर्नि
धिरव्ययः॥संभवोभावनोभर्त्ताप्रभवःप्रभुरी
श्वरः॥४॥स्वयंभूःशंभुरादित्यःपुष्कराक्षोमहा
स्वनः॥अनादिनिधनोधातावियोतावियोतुरुत्त
मः॥५॥अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः॥

वि·स·

५

विश्वकर्मामनुस्त्वष्टास्थविष्ठः स्थविरो ध्रुवः॥६
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः॥
प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परं॥७॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः॥
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥८
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥अ
नुत्तमो दुराधर्षः कृतिरः कृतिरात्मवान्॥९
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः॥अहः
संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥१०

राम

५

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः॥वृ
षाकपिरमेयात्मा सर्वयोगविनिस्सृतः॥११॥व
सुर्वसुमनाः सत्यसमात्मा समितः समः॥अमो
घः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः॥१२॥रुद्रो
बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः॥अमृतः
शाश्वतस्थाणुर्वरारोहो महातपाः॥१३॥सर्वगः
सर्वविद्भानुर्विष्वक्सेनो जनार्दनः॥वेदो वेदवि
द्व्यंगो वेदांगो वेदवित्कविः॥१४॥लोकाध्यक्षः
सुराध्यक्षो धर्माध्यक्षः कृताकृतः॥चतुरात्मा

चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥१५॥भ्राजिष्णुर्भोजि
नभोक्तासहिष्णुर्जगदादिजः॥अनघोविजयोजे
ताविश्वयोनिःपुनर्वसुः॥१६॥उपेंद्रोवामनःप्रां
शुरमोघःशुचिरूर्जितः॥अतींद्रःसंग्रहःसर्गोध
तात्मानियमोयमः॥१७॥वेद्योवैद्यःसदायोगीवी
रहामाधवोमधुः॥अतींद्रियोमहामायोमहोत्सा
होमहाबलः॥१८॥महाबुद्धिर्महावीर्योमहाश
क्तिर्महाद्युतिः॥अनिर्देश्यवपुःश्रीमानमेया
त्मामहाद्रिधृक्॥१९॥महेष्वासोमहीभर्तुश्री

नाभोरविंदाक्षःपद्मगर्भःशरीरभृत्॥मह
र्द्धिरृद्धोवृद्धात्मामहाक्षोगरुडध्वजः॥२०॥
अतुलःशरभोभीमःसमयज्ञोहविर्हरिः॥स
र्वलक्षणलक्षण्यालक्ष्मीवान्समितिंजयः
॥२१॥विक्षरोरोहितोमार्गोहेतुर्दामोदरःस
हः॥महीधरोमहाभागोवेगवानमिताशनः
॥४०॥उद्भवःक्षोभणोदेवःश्रीगर्भःपरमे
श्वरः॥करणंकारणंकर्ताविकर्तागहनोगु
हः॥४१॥व्यवसायोव्यवस्थानःसंस्थानःस्था

नदोध्रुवः॥परर्द्धिः परमस्पष्टः स्तुष्टः पुष्टः शु
भेक्षणः॥४२॥रामो विरामो विरजो मार्गो नेयो
नयोनयः॥४३॥वीरः शक्तिमतांश्रेष्ठो धर्मो
धर्मविदुत्तमः॥४३॥वैकुंठः पुरुषः प्राणः प्रा
णदः प्रणवः पृथुः॥हिरण्यगर्भः शत्रुघ्नो व्या
प्तो वायुरधोक्षजः॥४४॥ऋतुः सुदर्शनः का
लः परमेष्ठी परिग्रहः॥उग्रः संवत्सरो दक्षो
विश्रामो विश्वदक्षिणः॥४५॥विस्तारः स्था
वरः स्थाणुः प्रमाणं बीजमव्ययं॥अर्थोनर्थो

रामू
९

महाकोशो महाभोगो महाधनः॥४६॥अनि
विष्णः स्थविष्ठो भूर्धर्मयूपो महामखः॥नक्ष
त्रनेमिर्नक्षत्रीक्षमः क्षामः समीहनः॥४७॥य
ज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः॥सर्व
दर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं॥४८॥सु
व्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्॥
मनोहरो जितक्रोधो वीरबाहुर्विदारणः॥४९
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥५०

वि·स· धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरं॥ अ
विज्ञातासहस्रांशुर्विधाताकृतलक्षणः॥ ५१॥
१० गभस्तिनेमिसत्वस्थः सिंहोभूतमहेश्वरः॥
आदिदेवोमहादेवोदेवेशोदेवभृद्गुरुः॥५२
उत्तरोगोपतिर्गोप्तागोज्ञानगम्यः पुरातनः॥
शरीरभूतभृद्भोक्ताकपीन्द्रोभूरिदक्षिणः ५३
सोमपोमृतपः सोमः पुरुजित्पुरुसत्तमः॥५४ राम्
विनयोजयः सत्यसंधोदाशार्हः सात्वतां १०
तिः॥५४॥जीवोविनयितासाक्षीमुकुंदोमि

विक्रमः॥अंभोनिधिरनंतात्मामहोदधिश
यांतकः॥५५॥अजोमहार्हः स्वाभाव्योजिता
मित्रः प्रमोदनः॥आनंदोनंदनोनंदः सत्यध
र्मात्रिविक्रमः॥५६॥महर्षिः कपिलाचार्यः
कृतज्ञोमेदिनीपतिः॥त्रिपदस्त्रिदशाध्यक्षो
महाशृंगः कृतांतकृत्॥ ५७॥महावराहोगो
विंदः सुषेणः कनकांगदी॥५८गुह्योगभीरोग
हनोगुप्तश्चक्रगदाधरः॥५९॥वेधाः स्वांगोजि
तः कृष्णोदृढः संकर्षणोच्युतः॥वरुणोवारुणो

वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥ भगवान्भग
हानंदी विनमाली हलायुधः ॥ आदित्यो ज्योति
रादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥ सुधन्वा खं
डपरशुर्दारुणो द्रविणप्रदः ॥ दिविस्पृक्सर्व
दृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥ त्रिसा
मा सामगः साम निर्वाणं भेषजं भिषक् ॥ स
न्यासकृच्छमः शांतो निष्ठा शांतिः परायणः ॥
शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्री
वत्सरक्षा श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४ ॥ श्री
दः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्री
धरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ॥ ६५ ॥ स्व
क्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजितात्मा
विधेयात्मा सत्कीर्तिः च्छिन्नसंशयः ॥ ६६ ॥ उद्ध
र्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ॥ भूशयो
भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥ अर्चि
ष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरु

वि·स·

१२

प्रतिरथः प्रद्युम्नोमितविक्रमः॥६८॥ कालनेमिनि
हावीरः शौरिः शूरजनेश्वरः॥ त्रिलोकात्मा त्रिलो
केशः केशवः केशिहाहरिः॥६९॥ कामदेवः काम पा
लः कामीकांतः कृतागमः॥ अनिर्देश्यवपुर्विष्णुवी
रोनंतोधनंजयः॥७०॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्म ब्रह्म
ब्रह्मविवर्धनः॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्रा
ह्मणप्रियः॥७१॥ महाक्रमो महाकर्मा महाते
जा महोरगः॥ महाक्रतुर्महायज्वा महाहविः यज्ञो राम
महाहविः॥७२॥ स्तव्यः स्तवप्रियस्तोत्रं स्तुतिस्तो १२

ता रणप्रियः॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्तिर
नामयः॥७३॥ मनोजवस्तीर्थकरो वसुरेता व
सुप्रदः॥ वसुप्रदो वासुदेवो वसुर्वसुमनाहविः॥
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः॥७४
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥ भूता
वासो वासुदेवः सर्वासुनिलयोनलः॥७५॥ दर्प
हा दर्पदो दृप्तो दुर्धरो थापराजितः॥ विश्वमूर्तिर्म
हामूर्तिर्दीप्तमूर्तिरमूर्तिमान्॥७६॥ अनेकमू
र्तिरव्यक्तः शतमूर्तिः शताननः॥ एकोनेकः स

वः कविं यत्पदमनुत्तमं ॥ ७७ ॥ लोकबंधुर्लोक
नाथो माधवो भक्तवत्सलः ॥ सुवर्णवर्णो हेमांगो
वरांगश्चंदनांगदी ॥ ७८ ॥ वीरहा विषमः शून्यो
घृताशीलचलश्चलः ॥ अमानी मानदो मान्यो
लोकस्वामी त्रिलोकधृत् ॥ ७९ ॥ सुमेधा मेध
जो धन्यः सत्यमेधा धराधरः ॥ तेजोवृषो द्युति
धरः सर्वशस्त्रभृतां वरः ॥ ८० ॥ प्रग्रहो निग्रहो
व्यग्रो नैकशृंगो गदाग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतु
र्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरात्मा चतुर्भाव

श्चतुर्वेदविदेकपात् ॥ ८२ ॥ समावर्तो निवृत्तात्मा
दुर्जयो दुरतिक्रमः ॥ दुर्लभो दुर्गमो दुर्गो दुरावा
सो दुरारिहा ॥ ८३ ॥ शुभांगो लोकसारंगः सुतंतुस्त
तुवर्धनः ॥ इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥
उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अर्को वा
जसनः शृंगी जयंतः सर्वविज्जयी ॥ ८५ ॥ सुवर्ण
बिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदो म
हागर्तो महाभूतो महानिधिः ॥ ८६ ॥ कुमुदः कुंदरः
कुंदः पर्जनः पावनोनिलः ॥ अमृतांशोमृतवपुः

वि·स·
१४

सर्वज्ञः सर्वतोमुखः॥८७॥ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः॥ न्यग्रोधोदुंबरोऽश्वत्थः श्रीपूराशनिसूदनः॥८८॥ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः॥ अमूर्तिरनघोऽचिंत्योभयकृद्भयनाशनः॥८९॥ अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः॥९०॥ भारभृत्कथितो योगी योगीशः सर्वकामदः॥ आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥९१॥ धनुर्धरो धनुर्वेदो दं

राम
१४

डोदमयिता दमः॥ अपराजितः सर्वसहो नियंता नियमो यमः॥९२॥ सत्ववान्सात्विकः सत्यः सत्यधर्मपरायणः॥ अभिप्रायः प्रियार्हो ऽर्हः प्रियकृत्प्रीतिवर्धनः॥९३॥ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः॥ रविर्विरोचनः सूर्यः सविता रविलोचनः॥९४॥ अनंतो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः॥९५॥ सनात्सनातनतमः कपिलः कपिरव्ययः॥ स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्ति

वि·स·
१५

दक्षिणः॥९६॥अरौद्रः कुंडलीचक्री विक्रम्यूर्जित
शासनः॥शब्दातिगः शब्दसहः शिशिरः शर्व
रीकरः॥९७॥अक्रूरः पेशलो दक्षो दक्षिणः क्षमि
णांवरः॥विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः॥वी
रहा रक्षणः संतो जीवनः पर्यवस्थितः॥९९॥
अनंतरूपो नंतश्री र्जितमन्युर्भयापहः॥चतुर
स्रो गभीरात्मा विदिशो व्यादिशो दिशः॥१००॥
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः॥ज

राम्
१४

ननो जनजन्मादिर्भीमो भीमपराक्रमः॥१॥
आधारनिलयो धाता पुष्पहासः प्रजागरः॥ऊ
र्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥२॥
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः॥
तत्वं तत्वविदेकात्मा जन्ममृत्युजरातिगः॥३॥
भूर्भुवस्वस्तरुस्तारः सविता प्रपितामहः॥य
ज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः॥४॥य
ज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः॥
यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च॥५॥

आत्मयोनिःस्वयंजातोवैखानःसामगायनः॥दे
वकीनंदनःस्रष्टाक्षितीशःपापनाशनः॥६॥शंख
भृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः॥रथांगपाणि
रक्षोभ्यःसर्वप्रहरणायुधः॥७॥सर्वप्रहरणायु
धोन्नमइति॥इतिविष्णुसहस्रनामावलिस
माप्तः॥ ॥इतीदंकीर्तनीयस्यकेशवस्यमहात्म
नः॥नाम्नांसहस्रंदिव्यानामशेषेणप्रकीर्तितं॥
यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत्॥ना
शुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः॥ २॥

वेदांतगोब्राह्मणस्यात्क्षत्रियोविजयीभवेत्॥
वैश्योधनसमृद्धिस्याच्छूद्रःसुखमवाप्नुयात्
॥३॥धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुया
त्॥कामानवाप्नुयात्कामीप्रजार्थीचाप्नुयात्प्रजाः४
भक्तिमान्यःसदोत्थायशुचिस्तद्गतिमानसः॥स
हस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्तयेत्॥५॥
यशःप्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच॥अ
चलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमं॥६॥न
भयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति॥भवत्य

वि॰स॰ रोगोद्युतिमान्बलरूपगुणान्वितः॥७॥रोगा
तेमुच्येतरोगाद्बद्धोमुच्येतबंधनात्॥भया
९ न्मुच्येतभीतस्तुमुच्येतापन्नआपदः॥८॥दु
र्गाण्यतितरत्याशुपुरुषः पुरुषोत्तमं॥स्तुवन्ना
मसहस्रेणपुरु-नित्यंभक्तिसमन्वितः॥९॥
वासुदेवाश्रयोमर्त्योवासुदेवपरायणः॥सर्व
पापविशुद्धात्मायातिब्रह्मसनातनं॥१०॥
नवासुदेवभक्तानामशुभंविद्यतेक्वचित्॥
जन्ममृत्युजराव्याधिभयंनैवोपजायते॥११ ९७

इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः॥
युज्येतात्मासुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः
॥१२॥नक्रोधोनचमात्सर्यंनलोभोनाशुभामं
तिः॥भवंतिकृतपुण्यानांभक्तानांपुरुषोत्त
मे॥१३॥द्यौःसचंद्रार्कनक्षत्राःखंदिशोभूर्म
होदधिः॥वासुदेवस्यवीर्येणविधृतानिमहा
त्मनः॥१४॥ससुरासुरगंधर्वंसयक्षोरगरा
क्षसं॥जगद्वशेवर्ततेदंकृष्णस्यसचराचरं॥
॥१५॥इंद्रियाणिमनोबुद्धिःसत्वंतेजोबलंधृ

धृतिः॥वासुदेवात्मकान्याहुः क्षेत्रंक्षेत्रज्ञएव
च॥१५॥सर्वागमानामाचारः प्रथमंपरिकल्प
ते॥आचारः प्रथमोधर्मो धर्मस्यप्रभुरच्युतः॥
॥१६॥ऋषयः पितरोदेवामहाभूतानिधात
वः॥जंगमाजंगमंचेदंजगन्नारायणोद्भवं॥
॥१८॥योगोज्ञानंतथासांख्यंविद्याशिल्पादि
कर्मच॥वेदाःशास्त्राणिविज्ञानमेतत्सर्व
जनार्दनात्॥१९॥एकोविष्णुर्महद्भूतंपृथग्भू
तान्यनेकशः॥त्रीन्लोकान्व्याप्यभूतात्माभुं

क्तेविश्वभुगव्ययः॥२०॥इमंस्तवंभगवतोवि
ष्णोर्व्यासेनकीर्तितं॥पठेद्यइच्छेत्पुरुषःश्रेयः
प्राप्तुंसुखानिच॥२१॥विश्वेश्वरमजंदेवंजग
तःप्रभवाव्ययं॥भजंतियेपुष्पराक्षंनतेयांति
पराभवं॥२२॥नतेयांतिपराभवमिति॥ ॥
अर्जुनउवाच॥पद्मपत्रविशालाक्षपद्मगर्भस
दोत्तम॥भक्तानामनुरक्तानांत्राताभवजनार्द
न॥२३॥श्रीभगवानुवाच॥ ॥योमांनामस
हस्रेणस्तोतुमिच्छतिपांडव॥सोहमेकेनश्लो

वि·स·

१९

केनस्तुतएवनसंत्रायः॥२४॥नमोस्त्वनंताय
सहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे॥
सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटि
युगधारिणेनमः॥२५॥एषनिष्कंटकःपंथा
यत्रसंपूज्यतेहरिः॥कुपथंनविजानीयाद्रोवि
दरहितागमं॥२६॥ ॥इतिश्रीमन्महाभार
तेशांतिसाहस्र्यांसंहितायांव्यास्याख्यांशां
तिपर्वणिअनुशासनिकदानधर्मेभीष्मयु
धिष्ठिरसंवादेश्रीविष्णोर्दिव्यसहस्रनाम

राम्

१९

स्तोत्रंसंपूर्णं॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥
शाके१७४४ चित्रभानुनामसंवत्सरे॥ ॥
वैशाखशुक्लप्रतिपदाइंदुवासरेभरणी
नक्षत्रेतद्दिनेसायंकालेसमाप्तं॥पुस्तकं
लिखितं॥बोडसइत्फपनामकसदाशि
वेनलिखितं॥ ॥शुभंभवतु॥ ॥छ॥